श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ पञ्चमस्कन्धे द्वितीयोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

# ॥ पञ्चमस्कन्धे द्वितीयोऽध्यायः ॥

श्रीशुक उवाच

एवं पितरि सम्प्रवृत्ते तदनुशासने वर्तमान
आग्नीध्रो जम्बूद्वीपौकसः प्रजा
औरसवद्धर्मावेक्षमाणः
पर्यगोपायत् ॥ 1 ॥

स च कदाचित्पितृलोककामः
सुरवरवनिताक्रीडाचलद्रोण्यां
भगवन्तं विश्वसृजां पतिमाभृतपरिचर्योपकरण
आत्मैकाग्र्येण तपस्व्याराधयाम्बभूव ॥ 2 ॥

तदुपलभ्य भगवानादिपुरुषः सदसि गायन्तीं
पूर्वचित्तिं नामाप्सरसमभियापयामास ॥ 3 ॥

सा च तदाश्रमोपवनमतिरमणीयं विविधनिबिडविटपि -
विटपनिकरसंश्लिष्टपुरटलतारूढस्थलविहङ्गममिथुनैः
प्रोच्यमानश्रुतिभिः प्रतिबोध्यमानसलिलकुक्कुट -
कारण्डवकलहंसादिभिर्विचित्रमुपकूजितामलजलाशय -
कमलाकरमुप बभ्राम ॥ 4 ॥

तस्याः सुललितगमनपदविन्यासगतिविलासायाश्चानुपदं
खणखणायमानरुचिरचरणाभरणस्वनमुपाकर्ण्य
नरदेवकुमारः समाधियोगेनामीलितनयननलिनमुकुल -
युगलमीषद्विकचय्य व्यचष्ट ॥ 5 ॥

तामेवाविदूरे मधुकरीमिव सुमनस उपजिघ्रन्तीं
दिविजमनुजमनोनयनाह्लाददुघैर्गतिविहारव्रीडा -
विनयावलोकसुस्वराक्षरावयवैर्मनसि नृणां
कुसुमायुधस्य विदधतीं विवरं निजमुखविगलिता -
मृतासवसहासभाषणामोदमदान्धमधुकर -
निकरोपरोधेन द्रुतपदविन्यासेन वल्गुस्पन्दनस्तन -
कलशकबरभाररशनां देवीं तदवलोकनेन
विवृतावसरस्य भगवतो मकरध्वजस्य वशमुपनीतो
जडवदिति होवाच ॥ 6 ॥

का त्वं चिकीर्षसि च किं मुनिवर्य शैले
मायासि कापि भगवत्परदेवतायाः।
विज्ये बिभर्षि धनुषी सुहृदात्मनोऽर्थे
किं वा मृगान्मृगयसे विपिने प्रमत्तान् ॥ 7 ॥

बाणाविमौ भगवतः शतपत्रपत्रौ
शान्तावपुङ्खरुचिरावतितिग्मदन्तौ।
कस्मै युयुङ्क्षसि वने विचरन्न विद्मः
क्षेमाय नो जडधियां तव विक्रमोऽस्तु ॥ 8 ॥

शिष्या इमे भगवतः परितः पठन्ति
गायन्ति साम सरहस्यमजस्रमीशम्।
युष्मच्छिखाविलुलिताः सुमनोऽभिवृष्टीः
सर्वे भजन्त्यृषिगणा इव वेदशाखाः ॥ 9 ॥

वाचं परं चरणपञ्जरतित्तिरीणां
    ब्रह्मन्नरूपमुखरां शृणवाम तुभ्यम्।
लब्धा कदम्बरुचिरङ्कविटङ्कबिम्बे
    यस्याममलातपरिधिः क्व च वल्कलं ते॥ **10** ॥

किं सम्भृतं रुचिरयोर्द्विज शृङ्गयोस्ते
    मध्ये कृशो वहसि यत्र दृशिः श्रिता मे।
पङ्कोऽरुणः सुरभिरात्मविषाण ईदृग्
    येनाश्रमं सुभग मे सुरभीकरोषि॥ **11** ॥

लोकं प्रदर्शय सुहृत्तम तावकं मे
    यत्रत्य इत्थमुरसावयवावपूर्वौ।
अस्मद्विधस्य मन उन्नयनौ बिभर्ति
    बह्वद्भुतं स रसराससुधादि वक्त्रे॥ **12** ॥

का वाऽऽत्मवृत्तिरदनाद्धविरङ्ग वाति
    विष्णोः कलास्यनिमिषोन्मकरौ च कर्णौ।
उद्विग्नमीनयुगलं द्विजपङ्क्तिशोचि -
    रासन्नभृङ्गनिकरं सर इन्मुखं ते॥ **13** ॥

योऽसौ त्वया करसरोजहतः पतङ्गो
    दिक्षु भ्रमन् भ्रमत एजयतेऽक्षिणी मे
मुक्तं न ते स्मरसि वक्रजटावरूथं
    कष्टोऽनिलो हरति लम्पट एष नीवीम्॥ **14** ॥

रूपं तपोधन तपश्चरतां तपोघ्नं
    ह्येतत्तु केन तपसा भवतोपलब्धम्।
चर्तुं तपोऽर्हसि मया सह मित्र मह्यं
    किं वा प्रसीदति स वै भवभावनो मे॥ **15** ॥

न त्वां त्यजामि दयितं द्विजदेवदत्तं
यस्मिन्मनो दृगपि नो न वियाति लग्नम्।
मां चारुशृङ्ग्यर्हसि नेतुमनुव्रतं ते
चित्तं यतः प्रतिसरन्तु शिवाः सचिव्यः॥ **16** ॥

श्रीशुक उवाच
इति ललनानुनयातिविशारदो ग्राम्यवैदग्ध्यया
परिभाषया तां विबुधवधूं विबुधमतिरधिसभा -
जयामास॥ **17** ॥

सा च ततस्तस्य वीरयूथपतेर्बुद्धिशीलरूपवयः -
श्रियौदार्येण पराक्षिप्तमनास्तेन सहायुतायुत -
परिवत्सरोपलक्षणं कालं जम्बूद्वीपपतिना
भौमस्वर्गभोगान् बुभुजे॥ **18** ॥

तस्यामु ह वा आत्मजान् स राजवर आग्नीध्रो
नाभिकिम्पुरुषहरिवर्षेलावृतरम्यकहिरण्मयकुरु -
भद्राश्वकेतुमालसंज्ञान्नव पुत्रानजनयत्॥ **19** ॥

सा सूत्वाथ सुतान्नवानुवत्सरं गृह एवापहाय
पूर्वचित्तिर्भूय एवाजं देवमुपतस्थे॥ **20** ॥

आग्नीध्रसुतास्ते मातुरनुग्रहादौत्पत्तिकेनैव
संहननबलोपेताः पित्रा विभक्ता आत्मतुल्यनामानि
यथा भागं जम्बूद्वीपवर्षाणि बुभुजुः॥ **21** ॥

आग्नीध्रो राजातृप्तः कामानामप्सरसमेवानुदिन -
मधिमन्यमानस्तस्याः सलोकतां श्रुतिभिरवारुन्ध
यत्र पितरो मादयन्ते॥ **22** ॥

सम्परेते पितरि नव भ्रातरो मेरुदुहितॄर्मेरुदेवीं
प्रतिरूपामुग्रदंष्ट्रीं लतां रम्यां श्यामां
नारीं भद्रां देववीतिमिति संज्ञा नवोदवहन् ॥ **23** ॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
पञ्चमस्कन्धे आग्नीध्रवर्णनं नाम द्वितीयोऽध्यायः ॥